| पापी | रोगी | ायश्चित्तम् |
|---|---|---|
| १३ प्रतिमाभङ्गकारी | १३ अप्रतिष्ठः | १३ वत्सरत्रयपर्य्यन्तं प्रतिदिनं अश्वत्थसेचनानन्तरं गृह्योक्तविधिना समां गम्यानुदाहयेत् सुपूजितं विघ्नराजञ्च संस्थापयेत् ॥ |
| १४ मद्यपः | १४ रक्तपित्ती | १४ सर्पिषो घटं सहिरण्यं मधुनोऽर्द्धघटञ्च दद्यात् ॥ |
| १५ मार्गहा | १५ पादरोगी | १५ अश्वं दद्यात् ॥ |
| १६ रजस्वलादृष्टान्नभोक्ता | १६ कृमिलोदरः | १६ त्रिरात्रं गोमूत्रयावकं भुञ्जीत ॥ |
| १७ विषदः | १७ छर्द्दिरोगी | १७ दश पयस्विनीर्गा दद्यात् ॥ |
| १८ सभायां पक्षपाती | १८ पक्षघातवान् | १८ सत्यवर्त्तिने निष्कत्रयपरिमितं हेम दद्यात् ॥ |
| १९ सुरापः | १९ श्यावदन्तः | १९ प्राजापत्यव्रतञ्चरित्वा सप्ततुलापरिमितशर्करां दत्त्वा महारुद्रं जप्त्वा तद्दशांशं तिलैर्हुत्वा वरुणदैवतमन्त्रैरभिषेकं कुर्य्यात् ॥ |
| २० सुरालये जले वा शकृन्मूत्रकारी | २० गुदरोगी | २० मासं व्याप्य सुरार्च्चनं गोद्वयदानं प्राजापत्यमेकञ्च कुर्य्यात् ॥ * ॥<br>इति शातातपोक्तकर्म्मविपाकतृतीयाध्यायप्रकीर्णप्रायश्चित्तविवरणम् ॥ * ॥ |
| १ अगम्याभिगामी | १ ध्रुवमण्डली | १ कार्पासभारकांस्यदोहसंयुक्तसवत्सकतिलषष्टिमितहेमधेनुं "सुरभी वैष्णवी माता मम पापं व्यपोहतु" इमं मन्त्रमुच्चार्य्य दद्यात् ॥ |
| २ अश्वयोनिगामी | २ गुदस्तम्भी | २ मासं व्याप्य प्रतिदिनं सहस्रसङ्ख्यकमलकरणकशिरःस्नानं कुर्य्यात्। स्त्रीणामपि तत्तत्पुरुषसंसर्गात्तत्तत्प्रायश्चित्तम् ॥ |
| ३ आमान्नहारी | ३ हीनदीप्तिः | ३ निष्कद्वयस्वर्णनिर्म्मिताश्विनीकुमारौ दद्यात् ॥ |
| ४ इक्षोर्विकारहारी | ४ उदरगुल्मवान् | ४ गुड़धेनुं प्रदद्यात् ॥ |
| ५ ऊर्णाहारी | ५ लोमशः | ५ कम्बलान्वितनिष्कमितस्वर्णनिर्म्मितवह्निमूर्तिं अर्चयित्वा ब्राह्मणाय दद्यात् ॥ |
| ६ औषधापहर्त्ता | ६ सूर्य्यावर्त्तरोगी | ६ मासं व्याप्य सूर्य्यार्घ्यं काञ्चनञ्च दद्यात् ॥ |
| ७ कन्दमूलहारी | ७ कृशपाणिः | ७ यथाशक्ति देवगृहं उद्यानञ्च कुर्य्यात् ॥ |
| ८ कांस्यहारी | ८ पुण्डरीकसमन्वितः | ८ ब्राह्मणमलङ्कृत्य तस्मै शतपलं कांस्यं दद्यात् ॥ |
| ९ गुरुजायाभिगामी | ९ मूत्रकृच्छ्री | ९ नीलमाल्यादिभूषितनीलवस्त्राच्छन्नघटं पश्चिमस्यां दिशि संस्थाप्य तदुपरि ताम्रपात्रे षड्निष्कस्वर्णनिर्म्मितवरुणं पुरुषसूक्तेन यजेत। सामवेदी ब्राह्मणस्तत्र सामवेदमाचरेत् विंशतिनिष्कमितसुवर्णपुत्तलिकां निष्पापोऽहमित्युच्चार्य्य ब्राह्मणाय दद्यात्। "यादसामधिपो देवो विश्वेषामधिपो वरः। संसारनौकर्णधारो वरुणः पावनोऽस्तु मे" ॥ इति मन्त्रेण आचार्य्याय स्वर्णवरुणं दद्यात् ॥ |
| १० चाण्डालीगामी | १० हीनमुष्कः | १० मातृगामिवत् प्रायश्चित्तं कुर्य्यात् ॥ |
| ११ तपस्विनीप्रसक्तो | ११ प्रमेहगदी | ११ मासं व्याप्य रुद्रं जपेत् यथाशक्ति काञ्चनञ्च दद्यात् ॥ |
| १२ तपस्विनीसङ्गमी | १२ अश्मरीगदी | १२ मधुधेनुं हिरण्यसहितशतद्रोणपरिमिततिलञ्च दद्यात् ॥ |
| १३ ताम्बूलहारी | १३ श्वेतौष्ठः | १३ सदक्षिणोत्तमविद्रुमद्वयं दद्यात् ॥ |
| १४ ताम्रचौरः | १४ औडुम्बरी | १४ प्राजापत्यव्रतं शतपलपरिमितताम्रदानञ्च कुर्य्यात् ॥ |
| १५ तैलचौरः | १५ कण्ड्वादिपीड़ितः | १५ उपोष्य विप्राय तैलघटद्वयं दद्यात् ॥ |
| १६ त्रपुहारी | १६ नेत्ररोगवान् | १६ उपोष्य विधिवद्घृतधेनुं दद्यात् ॥ |
| १७ दधिचौरः | १७ मदवान् | १७ विप्राय दधिधेनुं दद्यात् ॥ |
| १८ दारुहारी | १८ स्विन्नपाणिः | १८ विदुषे पलद्वयपरिमितकुङ्कुमं दद्यात् ॥ |
| १९ दीक्षितस्त्रीप्रसक्तो | १९ दुष्टरक्तदृक्रोगी | १९ प्राजापत्यद्वयं कुर्य्यात् ॥ |
| २० दुग्धहारी | २० बहुमूत्रकः | २० ब्राह्मणाय यथाविधि दुग्धधेनुं दद्यात् ॥ |
| २१ देवहारी | २१ विविधज्वरी | २१ तत्र ज्वरे कर्णे रुद्रं जपेत् महाज्वरे महारुद्रं रौद्रज्वरे अतिरौद्रं वैष्णवज्वरे महारुद्रातिरौद्रौ च जपेत् ॥ |
| २२ नानाविधद्रव्यचौरः | २२ ग्रहणीयुक्तः | २२ शक्त्यनुसारेणान्नोदकवस्त्राणि हेम च दद्यात् ॥ |
| २३ पक्वान्नहारी | २३ जिह्वारोगी | २३ लक्षसंख्यकगायत्रीं जपेत् तिलकरणकं तद्दशांशहोमञ्च कुर्य्यात् ॥ |
| २४ पट्टसूत्रहर्त्ता | २४ विलोमा | २४ धेनुं दद्यात् ॥ |
| २५ पशुयोनिगामी | २५ मूत्राघाती | २५ तिलपात्रद्वयं दद्यात् ॥ |
| २६ पितृव्यस्त्रगन्ता | २६ दक्षिणांशव्रणी | २६ शक्तितः अजां दद्यात् ॥ |
| २७ पुत्रजायाभिगामी | २७ कृष्णकुष्ठी | २७ स्वसुतागमनप्रायश्चित्तस्यार्द्धं घृताक्ततिलकरणकदशांशहोमञ्च कुर्य्यात् ॥ |